348sk14

१४

उत्तररामचरितम् - चित्रदर्शनम् - १

प्रस्तावना

अस्मिन् पाठे चित्रदर्शनम् आरभते। श्रीरामः लक्ष्मणेन सह चित्रं नीत्वा सीतायाः समीपं गतः। तत्र गत्वा रामः सीतायाः सन्तोषार्थं लोकापवादविषये निन्दाम् करोति। ततः ते चित्रदर्शनं प्रारभन्ते। ताटकराक्षस्याः निधनवृत्तान्तात् तानि चित्राणि अङ्कितानि सन्ति। ततश्च ते वृत्तक्रमेण चित्राणि पश्यन्ति किञ्च चित्रविषये स्वाभिमतं प्रकाशयन्ति। तत्र मिथिलावृत्तान्तः, तेषां विवाहः, विवाहात् परम् अयोध्याप्राप्तिः, तत्कालीनं तेषां जीवनं च चित्रमाध्यमेन सम्यक् प्रकाशितं वर्तते। अस्मिन् चित्रदर्शनप्रसङ्गे कविः सीतामुखेन श्रीरामं राममुखेन च सीतां वर्णयति। एवं चित्रदर्शनेन कविः सम्पूर्णस्य अपि रामायणस्य वृत्तान्तानि स्मारयितुं चेष्टते। अस्मिन् पाठे वयं तस्य एव चित्रदर्शनस्य कञ्चिद् भागं पठामः।

उद्देश्यानि

अमुम् पाठं पठित्वा भवान् -

- रामसीतयोः शरीरसौन्दर्यादिकं जानीयात्।
- चित्रदर्शनमाध्यमेन सम्पूर्णस्य अपि रामायणस्य घटनाक्रमं ज्ञातुं शक्नुयात्।
- छन्दसां लक्षणानि जानीयात्।
- श्लोकानाम् अन्वयं प्रतिपदार्थादिकं च अवगच्छेत्।
- दीर्घानां पदानां विग्रहवाक्यं समासं च बोद्धुं समर्थः भवेत्।

१४.१) सम्पूर्णः मूलपाठः

सीता - होदु अज्जौत्त होदु। एहि। पेक्खह्म दाव दे चरिदम्। (भवत्वार्यपुत्र भवतु। एहि। प्रेक्षामहे तावत्ते चरितम्।)

(इत्युत्थाय परिक्रामति)

लक्ष्मणः - इदं तदालेख्यम्।

सीता - (निर्वर्ण्य) के एदे उवरिणिरन्तरदा उवत्थुवन्दि विअ अज्जउत्तम् (क एते उपरि निरन्तरस्थिता उपस्तुवन्तीवार्यपुत्रम्।)

लक्ष्मणः - देवि ! एतानि तानि सरहस्यानि जृम्भकास्त्राणि यानि भगवतः कृशाश्वात्कौशिकमृषिमुपसंक्रान्तानि। तेन ताटकावधे प्रसादीकृतान्यार्यस्य।

रामः - वन्दस्व देवि, दिव्यास्त्राणि।

ब्रह्मादयो ब्रह्महिताय तप्त्वा
परःसहस्रं शरदां तपांसि।
एतान्यपश्यन्गुरवः पुराणाः
स्वान्येव तेजांसि तपोमयानि॥१५॥

सीता- णमो एदारणम्। (नम एतेभ्यः)

रामः- सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्ति।

सीता- अणुगहीदह्मि। (अनुगृहीतास्मि।)

लक्ष्मणः - एष मिथिलावृत्तान्तः।

सीता -अम्महे, दलन्तणवणीलुप्पलसिणिद्धमसिणसोहमाणमंसलेन देहसोहग्गेण विह्मअत्थिमिदतादादीसन्तसोम्मसुन्दरसिरौ अणादरखंडिदसङ्करसरासणो सिहण्डमुद्धमुहमुण्डलो अज्जउत्तो आलिहिदो। (अहो, दलन्नवनीलोत्पलश्यामलस्निग्धमसृणशोभमानमांसलेन देहसौभाग्येन विस्मयस्तिमिततातदृश्यमानसौम्यसुन्दरश्रीरनादरत्रुटितशंकरशरासनः शिखण्ड मुग्धमुखमण्डल आर्यपुत्र आलिखितः।)

लक्ष्मणः - आर्ये ! पश्य पश्य।

सम्बन्धिनो वसिष्ठादीनेष तातस्तवार्चति।
गौतमश्च शतानन्दो जनकानां पुरोहितः ॥ १६ ॥

रामः - सुश्लिष्टमेतत्।

जनकानां रघूणां च सम्बन्धः कस्य न प्रियः।
यत्र दाता ग्रहीता च स्वयं कुशिकनन्दनः ॥ १७ ॥

सीता - एदे क्खु तक्कालकिदगोदाणमङ्गला चत्तारो भादरो विआहादिक्खिदा तुझे। अह्मो। जाणामि तस्सि जेव्व काले वत्तामि। (एते खलु तत्कालकृतगोदानमङ्गलाश्चत्वारो भ्रातरो विवाहदीक्षिता यूयम्। अहो! जानामि तस्मिन्नेव काले वर्ते।)

रामः - एवम्

समयः स वर्तत इवैष यत्र मां
समनन्दयत्सुमुखि! गौतमार्पितः।
अयमागृहीतकमनीयकङ्कण-
स्तव मूर्तिमानिव महोत्सवः करः ॥ १८ ॥

लक्ष्मणः - इयमार्या। इयमप्यार्या माण्डवी। इयमपि वधूः श्रुतकीर्तिः।

सीता - वच्छ, इयं वि अवरा का। (वत्स इयमप्यपरा का।)

लक्ष्मणः - (सलज्जास्मितम्। अपवार्य) अये, ऊर्मिलां पृच्छत्यार्या। भवतु। अन्यतः सञ्चारयामि। (प्रकाशम्)। आर्ये! दृश्यतां द्रष्टव्यमेतत्। अयं च भगवान्भार्गवः।

सीता - (ससंभ्रमम्) कम्पितास्मि। (कम्पिदह्मि)

रामः - ऋषे ! नमस्ते।

लक्ष्मणः - आर्ये! पश्य। अयमार्येण---(इत्यर्धोक्ते।)

रामः - (साक्षेपम्) अयि ! बहुतरं द्रष्टव्यम्। अन्यतो दर्शय।

सीता - (सस्नेहबहुमानं निर्वर्ण्य।) सुट्ठु सोहसि अज्जउत्त एदिणा विणअमाहप्पेण। (सुष्ठु शोभसे आर्यपुत्र ! एतेन विनयमाहात्म्येन।)

लक्ष्मणः- एते वयमयोध्यां प्राप्ताः।

रामः - (साश्रुम्) स्मरामि।

जीवत्सु तातपादेषु नूतने दारसंग्रहे।
मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः ॥ १९ ॥

इयमपि तदा जानकी -

प्रतनुविरलैः प्रान्तोन्मीलन्मनोहरकुन्तलै-
र्दशनकुसुमैर्मुग्धालोकं शिशुर्दधती मुखम्।
ललिततलितैर्ज्योत्स्नाप्रायैरकृत्रिमविभ्रमै-
रकृत मधुरैरम्बानां मे कुतूहलमङ्गकैः।।२०।।

लक्ष्मणः - एषा मन्थरा।

रामः - (सत्वरमन्यतो दर्शयन्) देवि वैदेहि।

इङ्गुदीपादपः सोऽयं शृङ्गवेरपुरे पुरा।
निषादपतिना यत्र स्निग्धेनासीत् समागमः।।२१।।

लक्ष्मणः - (विहस्य, स्वगतम्) अये मध्यमाम्बावृत्तमन्तरितमार्येण।

१४.२) साम्प्रतं मूलपाठम् अवगच्छाम - १६

सीता - होदु अज्जौत्त होदु। एहि। पेक्खह्म दाव दे चरिदम्। (भवत्वार्यपुत्र भवतु। एहि। प्रेक्षामहे तावत्ते चरितम्।)

(इत्युत्थाय परिक्रामति)

लक्ष्मणः - इदं तदालेख्यम्।

सीता - (निर्वर्ण्य) के एदे उवरिणिरन्तरदा उवत्थुवन्दि विअ अज्जउत्तम् (क एते उपरि निरन्तरस्थिता उपस्तुवन्तीवार्यपुत्रम्।)

लक्ष्मणः - देवि ! एतानि तानि सरहस्यानि जृम्भकास्त्राणि यानि भगवतः कृशाश्वात्कौशिकमृषिमुपसंक्रान्तानि। तेन ताटकावधे प्रसादीकृतान्यार्यस्य।

रामः - वन्दस्व देवि, दिव्यास्त्राणि।

ब्रह्मादयो ब्रह्महिताय तप्त्वा
परःसहस्रं शरदां तपांसि।
एतान्यपश्यन्गुरवः पुराणाः
स्वान्येव तेजांसि तपोमयानि॥१५॥

सीता- णमो एदारणम्। (नम एतेभ्यः)

रामः- सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्ति।

सीता- अणुगहीदह्मि। (अनुगृहीतास्मि।)

अन्वयः -

सीता - आर्यपुत्र भवतु भवतु। एहि। ते तावत् चरितं प्रेक्षामहे।

(इति उत्थाय परिक्रामति)

लक्ष्मणः - इदं तद् आलेख्यम्।

सीता - (निर्वर्ण्य) के एते उपरि निरन्तरस्थिता आर्यपुत्रम् उपस्तुवन्ति इव।

लक्ष्मणः - देवि ! एतानि तानि सरहस्यानि जृम्भकास्त्राणि यानि भगवतः कृशाश्वात् कौशिकम् ऋषिम् उपसङ्क्रान्तानि। तेन ताटकावधे आर्यस्य प्रसादीकृतानि।

रामः - देवि, दिव्यास्त्राणि वन्दस्व।

ब्रह्मादयः पुराणाः गुरवः ब्रह्महिताय शरदां परःसहस्रं तपांसि तप्त्वा एतानि स्वानि तपोमयानि तेजांसि एव अपश्यन्॥१५॥

सीता - एतेभ्यः नमः।

रामः - सर्वथा इदानीं त्वत्प्रसूतिम् उपस्थास्यन्ति।

सीता - अनुगृहीता अस्मि।

अन्वयार्थः -

सीता - आर्यपुत्र भवतु भवतु अस्तु अस्तु मम विषये प्रवादस्य चिन्ता न कर्तव्या। एहि आगच्छ। ते तव तावत् अपि चरितं चरित्रं प्रेक्षामहे पश्यामः। (इति उत्थाय परिक्रामति)

लक्ष्मणः - इदं तद् आलेख्यं चित्रम्।

सीता - (निर्वर्ण्य अवलोक्य) के एते इमे उपरि ऊर्ध्वं निरन्तरस्थिता अविरलं विहितावस्थानाः आर्यपुत्रम् उपस्तुवन्ति पूजयन्ति इव।

लक्ष्मणः - देवि मातः सीते! एतानि तानि सरहस्यानि गुह्यानि जृम्भकास्त्राणि विशेषशक्तिसम्पन्नानि दिव्यास्त्राणि यानि भगवतः देवात् कृशाश्वात् तन्नामकाद् ऋषेः कौशिकम् ऋषिम् कुशकर्षेः पुत्रं विश्वामित्रमहर्षिम् उपसङ्क्रान्तानि उपगतानि। तेन ताटकावधे ताटकासुरवधकाले आर्यस्य अनुकम्पया अग्रजाय रामचन्द्राय प्रसादीकृतानि आशीर्वादरूपेण अर्पितानि।

रामः - देवि प्रिये, दिव्यास्त्राणि जृम्भिकास्त्राणि वन्दस्व अभिवादयस्व।

ब्रह्मादयः ब्रह्मा आदिः येषां ते प्रजापतिप्रभृतयः पुराणाः प्राचीनाः गुरवः आचार्याः ब्रह्महिताय वेदस्य रक्षणाय शरदां वर्षाणां परःसहस्रं सहस्राधिकं तपांसि तपस्याः तप्त्वा विधाय एतानि इमानि स्वानि निजानि आत्मीयानि तपोमयानि तपस्याया उद्भूतानि तेजांसि तेजोरूपाणि एव अपश्यन् दृष्टवन्तः॥१५॥

सीता - एतेभ्यः नमः नमस्कारं विज्ञापयामि।

रामः - सर्वथा सर्वप्रकारेण इदानीम् अधुना त्वत्प्रसूतिम् तव सन्तानम् उपस्थास्यन्ति प्राप्स्यन्ति।

सीता - अनुगृहीता अनुग्रहं सम्प्राप्ता अस्मि भवामि।

व्याख्यानम् -

रामस्य प्रशंसावचनं श्रुत्वा आनन्दिता सीता रामेण सह चित्रं द्रष्टुमारभते। एकस्मिन् चित्रे उपरिभागे केचन निरन्तरस्थिताः भगवन्तं रामं स्तुवन्ति इति दृश्यते। ततः सा यदा अस्मिन् विषये लक्ष्मणं पृच्छति तदा लक्ष्मणः उत्तरं प्रयच्छति यद् एतानि हि मन्त्रयुक्तानि जृम्भकनामानि अस्त्राणि। भगवता कृशाश्वेन ऋषये कौशिकाय एतानि दिव्यास्त्राणि प्रदत्तानि। ताटकाराक्षसीवधावसरे भगवते रामचन्द्राय प्रसन्नो भूत्वा विश्वामित्रः इमानि अस्त्राणि रामाय अनुग्रहपूर्वकं दत्तवान्।

लक्ष्मणोक्तेः अनन्तरं सीतां प्रति तेषां दिव्यानाम् अस्त्राणां वन्दनाय उक्तवान्। भगवान् श्रीरामः दिव्यास्त्राणां स्वरूपं वर्णयति यत् पुरा दानवादयः बहवः अखिलधर्ममूलभूतं वेदं विनाशयितुम् उद्युक्ताः। अतः तान् निवारयितुं जगत्स्रष्टृप्रजापतिप्रभृतयः प्राचीनाः आचार्याः कठोरां तपस्याम् कर्तुम् आरब्धवन्तः। सरस्राधिकवत्सरान् व्याप्य तपांसि आचरितवन्तः। ततः परं ते स्वकीयानि तेजांसि इव समुत्पन्नानि दिव्यास्त्राणि अवलोकितवन्तः।

रामवचनात् तेषां जृम्भकास्त्राणां दिव्यत्वं ज्ञात्वा देवी सीता तानि दिव्यास्त्राणि प्रणमन्ति। रामः सीतां कथयति यत् यथा स एतानि प्राप्तवान् तथैव तयोः सन्ततिः अपि एतानि दिव्यास्त्राणि प्राप्स्यति। सीता रामं वदति यत् - सा तस्य वचनेन अनुगृहीता अस्ति इति।

व्याकरणविमर्शः -

१. निर्वर्ण्य – निर्–पूर्वकात् वर्ण–धातोः ल्यपि निर्वर्ण्य इति रूपम्।

२. उपस्तुवन्ति - उपपूर्वकात् स्तुधातोः लटि प्रथमपुरुषबहुवचने उपस्तुवन्ति इति रूपम्।

३. प्रसादीकृतानि - अप्रसादानि प्रसादानि कृतानि इत्यर्थे च्विप्रत्यये कृधातोः अनुप्रयोगे क्तप्रत्यये नपुंसके प्रथमाबहुवचने प्रसादीकृतानि इति रूपम्।

४. दिव्यास्त्राणि – दिव्यानि च तानि अस्त्राणि दिव्यास्त्राणि इति कर्मधारयसमासः।

५. उपसङ्क्रान्तानि - उपपूर्वकात् सम्पूर्वकात् क्रम्धातोः क्तप्रत्यये नपुंसके प्रथमाबहुवचने उपसङ्क्रान्तानि इति रूपम्।

६. ब्रह्मादयः - ब्रह्म आदिर्येषां ते ब्रह्मादयः इति बहुव्रीहिसमासः।

७. तप्त्वा - सन्तापार्थकात् तप्-धातोः क्त्वाप्रत्यये तप्त्वा इति रूपम्।

छन्दः - ब्रह्मादयः इत्यस्मिन् श्लोके इन्द्रवज्रोपेन्द्रवज्रयोः समावेशाद् उपजातिच्छन्दः। तल्लक्षणं छन्दोमञ्जर्याम्-

"अनन्तरोदीरितलक्ष्मभाजौ
पादौ यदीयावुपजातयस्ते।।" इति।

अलङ्कारविमर्शः -

१. ब्रह्मादय इति श्लोके शस्त्रदर्शनेन महापुरुषाणामपि कीर्तनाद् उदात्तालङ्कारः। तल्लक्षणम् -

"लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते।
यद्वापि प्रस्तुतस्याङ्गं महतां चरितं भवेत्।।" इति।

२. अस्मिन् श्लोके अद्भुतानां शस्त्राणां वर्णनेन भाविकालङ्कारः। तल्लक्षणं दर्पणे -

"अद्भुतस्य पदार्थस्य भूतस्याथ भविष्यतः।
यत्प्रत्यक्षायमाणत्वं तद्भाविकमुदाहृतम्।।" इति।

३. स्वान्येव तेजांसीत्यत्र रूपकालङ्कारः।

४. अलङ्कारत्रयस्य अङ्गाङ्गिभावात् सङ्करालङ्कारः।

पाठगतप्रश्नाः - १

१. दिव्यास्त्राणि कस्माद् विश्वामित्रेण सम्प्राप्तानि।

२. रामचन्द्रेण कदा कस्माद् दिव्यास्त्राणि आप्तानि।

३. ब्रह्मादयः किमर्थं तपः कृतवन्तः।

४. ब्रह्मादयः कियन्तं कालं तपः कृतवन्तः।

५. ते कीदृशानि दिव्यास्त्राणि अपश्यन्।

६. उपजातिच्छन्दसः किं लक्षणम्।

७. प्रसादीकृतानि इति रूपं साधयत।

१४.३) साम्प्रतं मूलपाठम् अवगच्छाम - १७

लक्ष्मणः - एष मिथिलावृत्तान्तः।

सीता - अम्महे, दलन्तणवणीलुप्पलसिणिद्धमसिणसोहमाणमंसलेन देहसोहग्गेण विह्मअत्थिमिदतादद्दीसन्तसोम्मसुन्दरसिरौ अणादरखंडिदसङ्करसरासणो सिहण्डमुद्धमुहमुण्डलो अज्जउत्तो आलिहिदो। (अहो, दलन्नवनीलोत्पलश्यामलस्निग्धमसृणशोभमानमांसलेन देहसौभाग्येन विस्मयस्तिमिततातदृश्यमानसौम्यसुन्दरश्रीरनादरत्रुटितशंकरशरासनः शिखण्ड -मुग्धमुखमण्डल आर्यपुत्र आलिखितः।)

लक्ष्मणः - आर्ये ! पश्य पश्य।

सम्बन्धिनो वसिष्ठादीनेष तातस्तवार्चति।
गौतमश्च शतानन्दो जनकानां पुरोहितः ॥ १६ ॥

रामः - सुश्लिष्टमेतत्।

जनकानां रघूणां च सम्बन्धः कस्य न प्रियः।
यत्र दाता ग्रहीता च स्वयं कुशिकनन्दनः ॥ १७ ॥

अन्वयः -

लक्ष्मणः - एष मिथिलावृत्तान्तः।

सीता - अहो, दलन्नवनीलोत्पलश्यामलस्निग्धमसृणशोभमानमांसलेन देहसौभाग्येन विस्मयस्तिमिततातदृश्यमानसौम्यसुन्दरश्रीः अनादरत्रुटितशङ्करशरासनः शिखण्डमुग्धमुखमण्डलः आर्यपुत्रः आलिखितः।

लक्ष्मणः - आर्ये ! पश्य पश्य।

एष तव तातः सम्बन्धिनः वसिष्ठादीन् अर्चति (तथा)। जनकानां पुरोहितः गौतमः शतानन्दः (सम्बन्धिनः वसिष्ठादीन् अर्चति)॥१६॥

रामः - सुश्लिष्टम् एतत्।

जनकानां रघूणां च सम्बन्धः कस्य न प्रियः। यत्र स्वयं कुशिकनन्दनः दाता ग्रहीता च॥१७॥

अन्वयार्थः -

लक्ष्मणः - एषः अयं मिथिलावृत्तान्तः मिथिलानगरोदन्तः।

सीता - अहो आश्चर्येण दलन्नवनीलोत्पलश्यामलस्निग्धमसृण-शोभमानमांसलेन दलत् विकसत् यत् नवं नूतनं नीलोत्पलं नीलकमलं तद् इव श्यामलं श्यामं स्निग्धं चिक्कणं मसृणं कोमलं शोभमानं सुन्दरं मांसलं बलवत् तेन देहसौभाग्येन शरीरसौन्दर्येण विस्मयस्तिमिततातदृश्यमानसौम्यसुन्दरश्रीः विस्मयेन आश्चर्येण स्तिमितः निश्चलः यः तातः पिता तेन दृश्यमाना अवलोक्यमाना सौम्या आह्लादकरी

सुन्दरी मनोहारिणी श्रीः शोभा यस्य तथोक्तः अनादरत्रुटितशङ्करशरासनः अनादरेण अवहेलया त्रुटितं भग्नं शङ्करस्य शिवस्य शरासनं धनुः येन तथोक्तः शिखण्डमुग्धमुखमण्डलः शिखण्डेन काकपक्षेण मुग्धं सुन्दरं मुखमण्डलं वदनमण्डलं यस्य स आर्यपुत्रः रामः आलिखितः चित्रितः।

लक्ष्मणः - आर्ये ! पश्य पश्य अवलोकय अवलोकय। एषः अयं तव भवत्याः सीतायाः तातः पिता जनकः जनकानां पुरोहितः जनकराजस्य पुरोधाः गौतमः शतानन्दः तन्नामकमुनिः सम्बन्धिनः वसिष्ठादीन् वरपक्षीयान् अर्चति सत्करोति॥१६॥

रामः - सुश्लिष्टं सुसम्बद्धम् एतत्।

जनकानां जनकवंशोद्भवानां रघूणां रघुवंशोद्भवानां नृपाणां च सम्बन्धः अपत्यसम्बन्धः कस्य पुरुषस्य न प्रियः अभिप्रेतः, अपि तु सर्वस्यापि अभिप्रेत इति भावः। यत्र यस्मिन् वैवाहिके सम्बन्धे स्वयं कुशिकनन्दनः विश्वामित्रः दाता दानकर्ता ग्रहीता च प्रतिग्रहीता च वर्तते।॥१७॥

व्याख्यानम् -

तदनन्तरं लक्ष्मणः तस्मिन् चित्रे मिथिलावृत्तान्तं दर्शयितुम् आरभते। तस्मिन् चित्रे अङ्कितं रामस्य सौन्दर्यम् अवलोक्य सीता प्रसन्ना सती- प्रस्फुटितनीलपद्मं यथा श्यामलं स्निग्धं मसृणं च भवति तादृशं शरीरं वर्तते श्रीरामचन्द्रस्य। तत्सौन्दर्यदर्शने निश्चलः पितृदेवः सविस्मयं तस्य कान्तिम् अवलोकते। श्रीरामः अनायासेन एव हरधनुः खण्डितवान्। शिखण्डेन तादृशस्य श्रीरामस्य मुखम् अत्यधिकं सुन्दरं दृश्यते।

ततश्च लक्ष्मणः सीतारामयोः विवाहकालीनं चित्रं दर्शयति। विवाहात् प्राग् वरपक्षिणः वसिष्ठादयः मिथिलानगरे नृपस्य जनकस्य गृहम् आगताः। तस्मिन् चित्रे सीतायाः पिता महाराजः जनकः तेषां वंशस्य कुलपुरोहितः गौतमः शतानन्दः वसिष्ठादीनां सत्कारं कुर्वन्ति। अनेन विवाहकालीनं घटनाचक्रं द्वयोः अपि स्मृतिपथि आगतम्।

अत्र सीतारामयोः विवाहस्य माहात्म्यं वर्णयति स्वयं श्रीरामः। अस्मिन् विवाहे कन्यारूपेण जनकवंशजा सीता वर्तते। वररूपेण च तिष्ठति रघुवंशीयः पुरुषोत्तमः श्रीरामः। उभयोः एव वंशौ पूज्यौ वर्तते। तयोः परिणयेन च एवंविधयोः द्वयोः वंशयोः मध्ये सम्बन्धः सम्भवति। किञ्च एतस्य विवाहस्य अपरमपि माहात्म्यं वर्तते। अत्र कन्यादानकर्ता कन्याग्रहणकर्ता च एकः एव वर्तते। स च कुशिकमुनिपुत्रः स्वयं कौशिकः। एवं विवाहस्य माहात्म्यं वर्णयन् श्रीरामः ताभ्यां जातः पुत्रः अपि सर्वगुणसम्पन्नः भविष्यति इति प्रकटयति।

व्याकरणविमर्शः -

१. मांसलम् - मांसम् अस्यास्तीति विग्रहे मांसशब्दात् लच्प्रत्यये मांसलशब्दो निष्पन्नः।

२. देहसौभाग्येन – सुभगस्य भावः इति विग्रहे सुभगशब्दात् ष्यञ्प्रत्यये सौभाग्यम् इति निष्पद्यते। देहस्य सौभाग्यम् देहसौभाग्यमिति षष्ठीतत्पुरुषसमासः, तेन।

३. अनादरखण्डितशङ्करशरासनः - अनादरेण खण्डितम् अनादरखण्डितमिति तृतीयातत्पुरुषसमासः। शङ्करस्य शरासनं शङ्करशरासनमिति षष्ठीतत्पुरुषसमासः। अनादरखण्डितं शङ्करशरासनं येन सः अनादरखण्डितशङ्करशरासनः इति बहुव्रीहिसमासः।

४. शिखण्डमुग्धमुखमण्डलः - शिखण्डेन मुग्धं शिखण्डमुग्धमिति तृतीयातत्पुरुषसमासः। शिखण्डमुग्धं मुखमण्डलं यस्य स शिखण्डमुग्धमुखमण्डलः इति बहुव्रीहिसमासः।

५. वसिष्ठादीन् - वसिष्ठ आदिर्येषां ते वसिष्ठादयः इति, तान् इति तद्गुणसंविज्ञानबहुव्रीहिः

६. गौतमः - गोतमस्यापत्यं पुमान् इत्यर्थे गोतमशब्दाद् अण्प्रत्यये गौतमः इति निष्पन्नम्।

७. पुरोहितः - पुरो धीयते इत्यर्थे पुरस् इत्युपपदे धाधातोः क्तप्रत्यये पुरोहितशब्दो निष्पन्नः।

८. ग्रहीता - ग्रह्-धातोः कर्तरि तृच्प्रत्यये निष्पन्नाद् ग्रहीतृशब्दात् पुंसि प्रथमैकवचने सौ ग्रहीता इति रूपम्।

छन्दः - सम्बन्धिनः, जनकानाम् इति श्लोकद्वये अनुष्टुप् छन्दः।

व्याकरणविमर्शः -

१. जनकानामिति श्लोक कस्य न प्रियः इत्यनेन अपि तु सर्वस्य प्रियः इत्यर्थान्तरस्य आपाताद् अर्थापत्तिरलङ्कारः।

पाठगतप्रश्नाः - २

८. आर्यपुत्रः कीदृश आलिखितः।

९. अनादरखण्डितशङ्करशरासनः इत्यत्र समासं लिखत।

१०. सीतायाः तातः कान् अर्चति।

११. जनकस्य पुरोहितः कः।

१२. जनकेन सह कः वसिष्ठादीन् अर्चति।

१३. कस्य कस्य च सम्बन्धः समेषां प्रियः।

१४. सम्बन्धे दाता ग्रहीता च कः।

१४.४) साम्प्रतं मूलपाठम् अवगच्छाम - १८

सीता - **एदे क्खु तक्कालकिदगोदाणमङ्गला चत्तारो भादरो विआहादिक्खिदा तुझे। अह्मो। जाणामि तस्सि जेव्व काले वत्तामि। (एते खलु तत्कालकृतगोदानमङ्गलाश्चत्वारो भ्रातरो विवाहदीक्षिता यूयम्। अहो! जानामि तस्मिन्नेव प्रदेशे तस्मिन्नेव काले वर्ते।)**

रामः - **एवम्**

समयः स वर्तत इवैष यत्र मां
समनन्दयत्सुमुखि! गौतमार्पितः।
अयमागृहीतकमनीयकङ्कण-
स्तव मूर्तिमानिव महोत्सवः करः ॥ १८ ॥

लक्ष्मणः - इयमार्या। इयमप्यार्या माण्डवी। इयमपि वधूः श्रुतकीर्तिः।

सीता - वच्छ, इयं वि अवरा का। (वत्स इयमप्यपरा का।)

लक्ष्मणः - (सलज्जास्मितम्। अपवार्य) अये, ऊर्मिलां पृच्छत्यार्या। भवतु। अन्यतः सञ्चारयामि। (प्रकाशम्)। आर्ये! दृश्यतां द्रष्टव्यमेतत्। अयं च भगवान्भार्गवः।

सीता - (ससंभ्रमम्) कम्पितास्मि। (कम्पिदह्मि)

रामः - ऋषे ! नमस्ते।

लक्ष्मणः - आर्ये! पश्य। अयमार्येण---(इत्यर्धोक्ते।)

रामः - (साक्षेपम्) अयि ! बहुतरं द्रष्टव्यम्। अन्यतो दर्शय।

सीता - (सस्नेहबहुमानं निर्वर्ण्य।) सुट्ठु सोहसि अज्जउत्त एदिणा विणअमाहप्पेण। (सुष्ठु शोभसे आर्यपुत्र ! एतेन विनयमाहात्म्येन।)

अन्वयः -

सीता - एते खलु तत्कालकृतगोदानमङ्गलाः यूयं चत्वारो भ्रातरो विवाहदीक्षिताः। अहो! जानामि तस्मिन् एव प्रदेशे तस्मिन् एव काले वर्ते।

रामः - एवम्,

हे सुमुखि, एष स समयः वर्तते इव, यत्र गौतमार्पितः आगृहीतकमनीयकङ्गणः अयं तव करः मूर्तिमान् महोत्सवः इव मां समनन्दयत्॥१८॥

लक्ष्मणः - इयम् आर्या। इयम् अपि आर्या माण्डवी। इयम् अपि वधूः श्रुतकीर्तिः।

सीता - वत्स, इयम् अपि अपरा का।

लक्ष्मणः - (सलज्जास्मितम्। अपवार्य) अये, आर्या ऊर्मिलां पृच्छति। भवतु। अन्यतः सञ्चारयामि। (प्रकाशम्)। आर्ये! दृश्यतां द्रष्टव्यम् एतत्। अयं च भगवान् भार्गवः।

सीता - (ससंभ्रमम्) कम्पिता अस्मि।

रामः - ऋषे ! नमस्ते।

लक्ष्मणः - आर्ये! पश्य। अयम् आर्येण---(इत्यर्धोक्ते।)

रामः - (साक्षेपम्) अयि ! बहुतरं द्रष्टव्यम्। अन्यतो दर्शय।

सीता - (सस्नेहबहुमानं निर्वर्ण्य।) आर्यपुत्र, एतेन विनयमाहात्म्येन सुष्ठु शोभसे।

अन्वयार्थः -

सीता - एते इमे खलु निश्चयेन तत्कालकृतगोदानमङ्गलाः तत्काले विवाहप्राक्काले कृतं सम्पादितं गोदानमङ्गलं केशदानरूपं मङ्गलकार्यं यैः ते यूयं चत्वारः भ्रातरः सहोदराः विवाहदीक्षिताः उद्वाहसंस्कृताः। अहो आश्चर्यम् जानामि चिन्तयामि यत् तस्मिन्नेव प्रदेशे स्थाने तस्मिन्नेव काले विवाहसमये वर्ते अस्मि।

रामः - एवं तथा,

हे सुमुखि शोभनवदने एषः अयं सः अनुभूतः समयः कालः वर्तते इव यत्र यस्मिन् काले गौतमार्पितः शतानन्दप्रदत्तः आगृहीतकमनीयकङ्कणः आगृहीतं धृतं कमनीयं सुन्दरं कङ्गणं करभूषणं येन सः परिहितमनोहरवलयः अयम् एष तव भवत्याः करः हस्तः मूर्तिमान् शरीरी महोत्सव इव मां रामं समनन्दत् आनन्दितमकरोत्॥१८॥

लक्ष्मणः - इयम् एषा आर्या भवती सीता। इयम् एषा अपि आर्या माण्डवी भरतपत्नी। इयम् अपि श्रुतकीर्तिः शत्रुघ्नपत्नी।

सीता - वत्स, इयम् अपि अपरा अन्या का।

लक्ष्मणः - (सलज्जास्मितं लज्जया स्मितेन च सहितम्, अपवार्य स्वगतम्) अये ऊर्मिलां मम पत्नीं पृच्छति जिज्ञासते आर्या सीता। भवतु अस्तु। अन्यतः अन्यत् किमपि चित्रं सञ्चारयामि पश्यामि। (प्रकाशम्) आर्ये भद्रे दृश्यताम् अवलोक्यतां द्रष्टव्यम् अवलोकनीयम् एतत् इदम्। अयम् एष च भगवान् भार्गवः भृगुपुत्रः परशुरामः।

सीता - (ससम्भ्रमम् सभयम्) कम्पिता अस्मि कम्पमाना भवामि।

रामः - ऋषे मुने नमः नमस्काराः ते तुभ्यम्।

लक्ष्मणः - आर्ये सीते! पश्य। अयं परशुरामः आर्येण रामचन्द्रेण ---(इत्यर्धोक्ते इति वाक्यसमापनात्पूर्वमेव)

रामः - (साक्षेपम् आक्षेपसहितम्) अयि! बहुतरं द्रष्टव्यम् बहु किमपि द्रष्टव्यम्। अन्यतो दर्शय अन्यत्र चित्रितं दर्शय।

सीता - (सस्नेहबहुमानं स्नेहेन बहुमानेन च सहितं निर्वर्ण्य अवलोक्य।) आर्यपुत्र! एतेन अनेन विनयमाहात्म्येन स्वोत्कर्षताकथनरूपेण विनयमाहात्म्येन सुष्ठु सुन्दरं शोभसे।

व्याख्यानम् -

ततः सीता विवाहसंस्कारेण संस्कृतान् केशदानं कुर्वतः चतुरः सहोदरान् रामलक्ष्मणभरतशत्रुघ्नान् पश्यति। सीता अन्वभूत् यत् सा तस्मिन् एव विवाहकाले इदानीम् अस्ति। अनेन चित्रकारस्य निपुणता ज्ञातुं शक्यते।

तदनु रामः वदति - अस्मिन् चित्रे तयोः विवाहकालीना सा स्थितिः चित्रिता यत्र सीतायाः हस्तः श्रीरामस्य हस्तस्य उपरि स्थापितः। तत् श्रीरामः एवं वर्णयति यत् सीताया हस्तः

सुन्दरकङ्कणभूषितः आसीत्। यदा पुरोहितः शतानन्दः सीतायाः हस्तं रामस्य हस्तस्य उपरि अस्थापयत् तदा सीतायाः कोमलः हस्तः श्रीरामम् अतीव अनन्दयत्। रामः सीताहस्तं महोत्सवरूपेण वर्णयति। यथा महोत्सवकाले महान् आनन्दः जायते तथा सीताहस्तसंस्पर्शेन अपि रामहृदये आनन्दतरङ्गः उत्थितः।

ततः लक्ष्मणः क्रमशः रामपत्नीं भरतपत्नीं माण्डवीं शत्रुघ्नपत्नीं श्रुतकीर्तिं स्वपत्नीम् ऊर्मिलां च दृष्टवान् सीतां च दर्शयति। तदनन्तरं लक्ष्मणः अन्यद् एकं चित्रम् अपश्यत् यत्र भगवान् श्रीपरशुरामः चित्रितः। तत् दृष्ट्वा देवी सीता कम्पिता । ततः श्रीरामः परशुरामं प्रणमति।

तदा लक्ष्मणः रामेण परशुरामः पराजितः इति वक्तुं यावत् प्रवर्तते तावत् श्रीरामः तं तस्माद्वर्णनात् निवार्य अपरं चित्रं प्रदर्शयितुं कथयति। तदा रामस्य विनयम् अवलोक्य सीता रामस्य विनयाधिक्येन प्रकाशितं सौन्दर्यं वर्णयति।

व्याकरणविमर्शः -

१. समनन्दयत्- समुपसर्गपुर्वकात् नन्द्धातोः णिचि लङि प्रथमपुरुषैकवचने समनन्दयत् इति रूपम्।

२. सुमुखि- शोभनं मुखं यस्याः सा सुमुखी सम्बोधनैकवचने सुमुखि इति रूपम्।

३. आगृहीतकमनायकङ्णः– आपूर्वकात् ग्रह्–धातोः क्तप्रत्यये आगृहीत इति रूपम्। आगृहीतं कमनीयं कङ्कणं येन सः आगृहीतकमनीयकङ्कणः।

४. महोत्सवः - महान् च असौ उत्सवः महोत्सवः इति कर्मधारयसमासः।

५. विनयमाहात्म्येन – विनयस्य माहात्म्यं विनयमाहात्म्यम्, तेनेति षष्ठीतत्पुरुषसमासः।

छन्दः -

१. समयः स इत्यस्मिन् श्लोके मञ्जुभाषिणीच्छन्दः। तल्लक्षणं छन्दोमञ्जर्यां - "सहसा जगौ भवति मञ्जुभाषिणी" इति।

अलङ्कारविमर्शः -

१. समयः स इत्यस्मिन् श्लोके वर्तते इव इति क्रियोत्प्रेक्षा, मूर्तिमान् महोत्सव इव इति गुणोत्प्रेक्षा, भूतस्य वृत्तान्तस्य प्रस्तावाच्च भाविकालङ्कारः।

पाठगतप्रश्नाः - ३

१५. रामादयः भ्रातरः चित्रे कीदृशाः।

१६. तस्मिन्नेव काले इत्यनेन कः कालः अभिप्रेतः।

१७. सीतायाः करः केन रामस्य हस्ते अर्पितः।

१८. सीतायाः करः कीदृशः।

१९. सीतायाः हस्तः रामं किम् इव आनन्दितम् अकरोत्।

२०. मञ्जुभाषिणीवृत्तस्य लक्षणं लिखत।

२१. रामः केन माहात्म्येन शोभते।

१४.५) साम्प्रतं मूलपाठम् अवगच्छाम - १९

लक्ष्मणः- **एते वयमयोध्यां प्राप्ताः।**

रामः - **(सास्रम्) स्मरामि, हन्त स्मरामि।**

जीवत्सु तातपादेषु नूतने दारसंग्रहे।
मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः ॥ १९ ॥
इयमपि तदा जानकी -

प्रतनुविरलैः प्रान्तोन्मीलन्मनोहरकुन्तलै-
र्दशनकुसुमैर्मुग्धालोकं शिशुर्दधती मुखम्।
ललिततलितैर्ज्योत्स्नाप्रायैरकृत्रिमविभ्रमै-
रकृत मधुरैरम्बानां मे कुतूहलमङ्गकैः।।२०।।

लक्ष्मणः - **एषा मन्थरा।**

रामः - **(सत्वरमन्यतो दर्शयन्) देवि वैदेहि।**

इङ्गुदीपादपः सोऽयं शृङ्गवेरपुरे पुरा।
निषादपतिना यत्र स्निग्धेनासीत् समागमः।।२१।।

लक्ष्मणः - **(विहस्य, स्वगतम्) अये मध्यमाम्बावृत्तमन्तरितमार्येण।**

अन्वयः -

लक्ष्मणः:- एते वयम् अयोध्यां प्राप्ताः।

रामः - (सास्रम्) स्मरामि, हन्त स्मरामि।

तातपादेषु जीवत्सु दारसंग्रहे नूतने मातृभिः चिन्त्यमानानां नः ते हि दिवसा गताः॥१९॥

इयमपि तदा जानकी -

प्रतनुविरलैः प्रान्तोन्मीलन्मनोहरकुन्तलैः दशनकुसुमैः मुग्धालोकं मुखं दधती शिशुः ललितललितैः ज्योत्स्नाप्रायैः अकृत्रिमविभ्रमैः मधुरैः अङ्गकैः मे अम्बानां च कुतूहलम् अकृत।।२०।।

लक्ष्मणः - एषा मन्थरा।

रामः - (सत्वरमन्यतो दर्शयन्) देवि वैदेहि।

शृङ्गवेरपुरे अयं स इङ्गुदीपादपः. यत्र पुरा स्निग्धेन निषादपतिना समागमः आसीत्।।२१।।

लक्ष्मणः - (विहस्य, स्वगतम्) अये आर्येण मध्यमाम्बावृत्तम् अन्तरितम्।

अन्वयार्थः -

लक्ष्मणः- एते वयम् अयोध्यां प्राप्ताः वयम् अयोध्यां प्राप्तवन्तः तथा आलिखिताः।

रामः - (सास्रम् अश्रुपातपूर्वकम्) स्मरामि, हन्त स्मरामि।

तातपादेषु पितृचरणेषु जीवत्सु प्राणं दधत्सु दारसंग्रहे विवाहे नूतने नवे मातृभिः जननीभिः चिन्त्यमानानां लाल्यमानानां नः अस्माकं ते पूर्वानुभूताः हि निश्चयेन दिवसाः गताः दिवसाः व्यतीताः॥ १९॥

इयम् एषा अपि तदा विवाहात् परं जानकी देवी सीता -

प्रतनुविरलैः प्रतनूनि च तानि विरलानि तैः अतिसूक्ष्मानिविडैः प्रान्तोन्मीलन्मनोहरकुन्तलैः प्रान्तोन्मिलन्तः कपोलप्रान्ते स्फुरन्तः तैः मनोहरैः कुन्तलैः सुन्दरैः केशैः, दशनकुसुमैः कुसुमतुल्यदन्तैः मुग्धालोकं दर्शनीयं मुखम् आननं दधती धारयन्ती शिशुः बालिका इयं जानकी अपि एषा सीता अपि ललितललितैः मनोहरादपि मनोहरैः ज्योत्स्नाप्रायैः कौमुदीतुल्यैः अकृत्रिमविभ्रमैः स्वाभाविकविलासैः मधुरैः प्रियैः अङ्कैः अवयवैः मे मम अम्बानां जननीनां कौशल्यादीनां कुतूहलं कौतुकम् अकृत अकरोत्॥ २०॥

लक्ष्मणः - एषा मन्थरा अर्थाद् अयं मन्थरवृत्तान्तः आलिखितः।

रामः - (सत्वरम् शीघ्रम् अन्यतो मन्थरावृत्तान्तसूचकस्थलाद् अन्यत्र दर्शयन् अवलोकयन्) देवि प्रिये वैदेहि सीते।

शृङ्गवेरपुरे शृङ्गवेरपुराख्ये स्थाने अयम् एष स पूर्वदृष्टः इङ्गुदीपादपः तापसतरुः यत्र वनगमनकाले पुरा पूर्वं स्निग्धेन स्नेहयुक्तेन परमभक्तेन निषादपतिना निषादाधिपेन गुहेन समागमः साक्षात्कारः आसीत् प्रवृत्तः।।२१।।

लक्ष्मणः - (विहस्य सस्मितम्, स्वगतम् आत्मगतम्) अये अहो आर्येण श्रीरामेण मध्यमाम्बावृत्तम् कैकेय्याः चरितम् अन्तरितम् निह्नुतम्।

व्याख्यानम् -

ततः परस्मिन् चित्रे विवाहात् परं तेषाम् अयोध्यानगरप्राप्तिः अङ्किता। रामः सक्रन्दनं कथयति यत् स सर्वमेतत् वृत्तान्तं स्मरति इति।

अत्र श्रीरामः विवाहात् परं तेषां जीवनं कथम् अतिवाहितम् इति वर्णयति। स वदति यत् तस्मिन् काले तस्य पितृचरणाः जीविताः आसन्। अतः राज्यादिविषये सर्वं चिन्तनादिकं स करोति स्म। अपि च तेषां मातरः तेषां सुखदुःखादिविषये सततं चिन्तयन्त्यः आसन्। मातृषु पितृषु च सत्सु ते सर्वथा एव चिन्तामुक्ताः आसन्। एवं तस्मिन् काले तेषां दिनानि सुखेन गच्छन्ति स्म। अत्र तानि सुखमयानि दिनानि चित्रम् अवलोक्य स्मृतिपथमायान्ति श्रीरामचन्द्रस्य।

ततः श्रीरामः चित्रे चित्रितायाः विवाहोत्तरवर्तिकालीनायाः सीतायाः शरीरसौन्दर्यं वर्णयति। सीतायाः मुखम् अतीव निपुणतया भगवता निर्मितम्। अतः तद् विरलम् आसीत्। तस्याः सुन्दरकेशाः मुखस्य उपरि स्फुरन्ति स्म। तस्याः श्वेताः दन्ताः पुष्पाणि इव कोमलानि आसन्। एवं मोहकरं

मुखमण्डलं धारयन्त्याः सीतायाः अङ्गानि अतिकोमलानि आसन्। यथा ज्योत्स्ना जनानां मनसि प्रमोदम् उत्पादयति तथा स्वाभाविकतया विलासयुक्तानि सीतायाः अङ्गानि अपि रामस्य तथा तस्य जननीनां कौशल्याकैकेयीसुमित्राणां मनःसु कुतूहलम् असृजत्। अतः ताः पुनः पुनः जानकीम् अवलोकितुम् समुत्सुकाः आसन्।

ततः मन्थरावृत्तान्तं यदा लक्ष्मणः दर्शयति तदा रामः कैकेय्या मातुः अपवादविषयकम् आलोचनम् अनिच्छन् चित्रान्तरं पश्यति। यत् दृष्ट्वा स सीतां प्रति कथयति यत् अयमेव स तापसतरुः यत्र निषादराजेन गुहेन सह तस्य साक्षात्कारो जातः।

व्याकरणविमर्शः -

१. जीवत्सु- जीव्-धातोः शतृप्रत्यये सप्तमीबहुवचने जीवत्सु इति रूपम्।

२. चिन्त्यमानानाम्- चिन्त्-धातोः कर्मणी शानचि षष्ठीबहुवचने चिन्त्यमानानाम् इति रूपम्।

३. प्रान्तोन्मीलन्मनोहरकुन्तलैः- प्रान्तयोः उन्मीलन्तः प्रान्तोन्मीलन्तः इति सप्तमीतत्पुरुषः। मनोहराः कुन्तलाः मनोहरकुन्तलाः इति कर्मधारयसमासः। प्रान्तोन्मीलन्तः मनोहरकुन्तलाः प्रान्तोन्मीलन्मनोहरकुन्तलाः, तैः इति कर्मधारयसमासः।

४. दशनकुसुमैः– दशनाः कुसुमानीव तैः दशनकुसुमैः इति कर्मधारयसमासः।

५. मुग्धालोकम्- मुग्धः आलोकः यस्य तत् मुग्धालोकम् इति बहुव्रीहिसमासः।

६. अकृत्रिमविभ्रमैः- अकृत्रिमाः विलासाः येषां तैः अकृत्रिमविभ्रमैः इति बहुव्रीहिसमासः।

छन्दः-

१. जीवत्सु इति श्लोके अनुष्टुप् छन्दः।

२. प्रतनुविरलैः इति श्लोके हरिणीछन्दः। तल्लक्षणं तावत्- "नसमरसला गः खड्वैदैर्हयैर्हरिणी मता" इति।

अलङ्कारविमर्शः -

१. जीवत्सु इति श्लोके दिवसानां सुखप्रदत्वे सत्यपि, तातपादानां जीवितत्वे पुनः नवविवाहरूपस्य हेत्वन्तरस्य खले कपोतिकान्यायात् साहित्येन एकत्रावतारणात् समुच्चयालङ्कारः।

२. प्रतनुविरलैः इत्यत्र मुग्धनायिकावत् असाधारणचेष्टादीनां वर्णनात् स्वभावोक्त्यलङ्कारः। तल्लक्षणं दर्पणे -

"स्वभावोक्तिर्दुरूहार्थस्वक्रियारूपवर्णनम्।" इति।

३. ज्योत्स्नाप्रायैः इत्यत्र लुप्तोपमालङ्कारः।

४. स्वभावोक्तेः उपमाया अङ्गाङ्गिभावात् सङ्करालङ्कारः।

पाठगतप्रश्नाः - ४

२२. श्रीरामस्य विवाहात्परं राज्यादिविषये कः चिन्तनं करोति स्म।

२३. कीदृशा दिवसाः रामादीनां गताः।

२४. सीतायाः केशाः कीदृशाः।

२५. सीतायाः दन्ताः कीदृशाः।

२६. सीतायाः मुखं कीदृशम्।

२७. सीताया अवयवाः कीदृशाः।

२८. कुत्र निषादराजेन सह रामस्य साक्षात्कारः सम्पन्नः।

पाठसारः

रामस्य प्रशंसावचनं श्रुत्वा आनन्दिता सीता रामेण सह चित्रं द्रष्टुमारभते।प्रथमतः ते तत् चित्रं पश्यन्ति यत्र ताटकावधकाले सन्तुष्टः ऋषिः वैश्वामित्रः कृशाश्वात् समालब्धानि दिव्यास्त्राणि अनुकम्पया रामाय प्रायच्छत्। रामवचनात् तेषां जृम्भकास्त्राणां दिव्यत्वं ज्ञात्वा देवी सीता तानि दिव्यास्त्राणि प्रणमन्ति। रामः सीतां कथयति यत् यथा स एतानि प्राप्तवान् तथैव तयोः सन्ततिः अपि एतानि दिव्यास्त्राणि प्राप्स्यति। सीता रामं वदति यत् - सा तस्य वचनेन अनुगृहीता अस्ति इति।

तदनु लक्ष्मणः मिथिलावृत्तान्तात्मकं चित्रं प्रदर्शयति। तत्र श्रीरामस्य चित्रम् अवलोक्य सीता तस्य देहादिसौन्दर्यं वर्णयति। ततः स कथं अनायासेन हरशरासनम् अखण्डयत् इति कथयति। ततः तेषां विवाहकालीनानि चित्राणि आगतानि यत्र विवाहात् पूर्वं चत्वारः भातरः रामलक्ष्मणभरतशत्रुघ्नाः केशदानरूपं मङ्गलकार्यं कुर्वन्तः सन्ति। तत्र एकत्र स्वयं जनकः तस्य पुरोहितः शतानन्दः च वसिष्ठादीनां वरपक्षीयाणां सत्काररतौ आस्ताम्। ततः श्रीरामः तयोः विवाहस्य माहात्म्यम् वर्णयति। सः कथयति यत् जनकरघुवंशयोः च मध्ये सम्बन्धः कस्य न अभीष्टः इति। पुनश्च यस्मिन् विवाहे कन्यादाता कन्याग्राहकः च स्वयं विश्वामित्रः। पुरोहितः सीतायाः कङ्कणशोभितं हस्तं तस्य हस्तस्य उपरि स्थापनान्तरं श्रीरामः आनन्दितः अभवत्।

ततः ते क्रमेण भरतपत्नीं माण्डवीं शत्रुघ्नपत्नीं श्रुतकीर्तिं लक्ष्मणपत्नीम् ऊर्मिलां च पश्यन्ति। तदनन्तरम् एकस्मिन् चित्रे ते परशुरामम् पश्यन्ति। ततः यावत् लक्ष्मणः श्रीरामेण महावीरः परशुरामः पराजितः इति रामपराक्रमं वर्णयितुं प्रारभते तावत् श्रीरामः तं बाधित्वा प्रसङ्गम् एव परिवर्तयति। रामस्य एवंविधं विनयम् अवलोक्य सीता मुग्धा भवति। परस्मिन् चित्रे ते पश्यन्ति यत् ते सर्वे भातरः विवाहानन्तरं सपत्नीका अयोध्यां प्राप्ताः। श्रीरामः - मातृषु पितृषु सततं तेषां सुखादिविषये चिन्तयत्सु

कथं सुखेन तेषां दिनानि गच्छन्ति स्म, कथं सीतायाः अपरिसीमं सौन्दर्यम् अवलोक्य तस्य मातरः स्वयं स च कौतुकाक्रान्ताः सञ्जाताः इत्यादिकं सर्वं मनोरमरीत्या वर्णयति।

ततः रामो मन्थरावृत्तान्तं त्यक्त्वा चित्रालिखितम् इङ्गुदीपादपं दृष्ट्वा कथयति अत्रैव तस्य निषादराजेन गुहेन सह साक्षात्कारः सम्पन्नः। एवं समासेनास्य पाठस्य सारः प्रस्तुतः।

पाठान्तप्रश्नाः

१. दिव्यास्त्रवृत्तान्तं ब्रह्मादयो ब्रह्महिताय इत्यादिश्लोकव्याख्यानपुरःसरं वर्णयत।
२. सीतया कृतं रामवर्णनं यथामति लिख्यताम्।
३. समयः स वर्तते इति श्लोकं व्याख्यात।
४. विवाहवृत्तान्तं वर्णयत।
५. प्रतनुविरलैः इत्यादिश्लोकं व्याख्यात।

पाठगतप्रश्नानामुत्तराणि

१. दिव्यास्त्राणि कृशाश्वाद् विश्वामित्रेण सम्प्राप्तानि।
२. रामचन्द्रेण ताटकावधसमये विश्वामित्राद् दिव्यास्त्राणि आप्तानि।
३. ब्रह्मादयः वेदस्य संरक्षणाय तपः कृतवन्तः।
४. ब्रह्मादयः शरदां परःसहस्रं तपः कृतवन्तः।
५. ते स्वकीयानि तेजांसि इव दिव्यास्त्राणि अपश्यन्।
६. उपजातिच्छन्दसः लक्षणं तावद् -

"अनन्तरिदीरितलक्ष्मभाजौ
पादौ यदीयावुपजातयस्ते।"

७. अप्रसादानि प्रसादानि कृतानि इति प्रसादशब्दाद् च्विप्रत्यये करोतेरनुप्रयोगे क्तप्रत्यये प्रथमाबहुवचने प्रसादीकृतानि इति रूपम्।
८. आर्यपुत्रः प्रस्फुटन्नवनीलोत्पलसदृशश्यामलेन स्निग्धेन मसृणेन बलवता शरीरसौन्दर्येण विस्मयस्तिमितजनकदृश्यमानसुन्दरश्रीः हेलया खण्डितशङ्करशरासनः शिखण्डमुग्धमुखमण्डलः आलिखितः।
९. अनादरेण खण्डितम् अनादरखण्डितमिति तृतीयातत्पुरुषसमासः। शङ्करस्य शरासनं शङ्करशरासनमिति षष्ठीतत्पुरुषसमासः। अनादरखण्डितं शङ्करशरासनं येन सः अनादरखण्डितशङ्करशरासनः इति बहुव्रीहिसमासः।।

१०. सीतायाः तातः वसिष्ठादीन् सम्बन्धिनः अर्चति।

११. जनकस्य पुरोहितः गौतमः शतानन्दः।

१२. जनकेन सह गोतमसुतः शतानन्दः वसिष्ठादीन् अर्चति।

१३. जनकवंशस्य रघुवंशस्य च सम्बन्धः समेषां प्रियः।

१४. सम्बन्धे दाता ग्रहीता च कुशिकनन्दनः विश्वामित्रः।

१५. रामादयः भ्रातरः चित्रे विवाहकालकृतगोदानमङ्गलाः विवाहदीक्षिता दृश्यन्ते।

१६. तस्मिन्नेव काले इत्यनेन विवाहकालः अभिप्रेतः।

१७. सीतायाः करः शतानन्देन रामस्य हस्ते अर्पितः।

१८. आगृहीतकमनीयकङ्कणः मूर्तिमान् महोत्सव इव सीतायाः करः।

१९. सीतायाः हस्तः मूर्तिमान् महोत्सव इव रामम् आनन्दितम् अकरोत्।

२०. मञ्जुभाषिणीवृत्तस्य लक्षणम् - "सहसा जगौ भवति मञ्जुभाषिणी" इति।

२१. रामः विनयमाहात्म्येन शोभते।

२२. श्रीरामस्य विवाहात्परं राज्यादिविषये तज्जनकः दशरथः चिन्तनं करोति स्म।

२३. दशरथे जीविते नवदारपरिग्रहात्परं मातृभिः परिपाल्यमानानां रामादीनां दिवसाः सानन्दं गताः।

२४. सीतायाः केशाः प्रतनुविरलाः कपालप्रान्ते विकसन्तः मनोहराः सन्ति।

२५. सीतायाः दन्ताः कुसुमसदृशाः भवन्ति।

२६. सीतायाः मुखं मुग्धालोकम्।

सीताया ललितादपि ललिताः चन्द्रिकासदृशाः स्वाभाविकविलासाः मधुराः अवयवाः।

२७. शृङ्गवेरपुरे इङ्गुदीपादपस्य समीपे निषादराजेन सह रामस्य साक्षात्कारः सम्पन्नः।

॥ इति चतुर्दशः पाठः ॥